श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पवनजाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पवनजाष्टकम् ॥

भवभयाऽपहं भारतीपतिं
भजकसौख्यदं भानुदीधितिम्।
भुवनसुन्दरं भूतिदं हरिं
भजत सज्जना मारुतात्मजम् ॥ 1 ॥

अमितविक्रमं ह्यञ्जनासुतं
भयविनाशनं त्वब्जलोचनम्।
असुरघातिनं ह्यब्धिलङ्घिनं
भजत सज्जना मारुतात्मजम् ॥ 2 ॥

परभयङ्करं पाण्डुनन्दनं
पतितपावनं पापहारिणम्।
परमसुन्दरं पङ्कजाननं
भजत सज्जना मारुतात्मजम् ॥ 3 ॥

कलिविनाशकं कौरवान्तकं
कलुषसंहरं कामितप्रदम्।
कुरुकुलोद्भवं कुम्भिणीपतिं
भजत सज्जना मारुतात्मजम् ॥ 4 ॥

मतविवर्धनं मायिमर्दनं
मणिविभञ्जनं मध्वनामकम्।
महितसन्मतिं मानदायकं
भजत सज्जना मारुतात्मजम् ॥ 5 ॥

द्विजकुलोद्भवं दिव्यविग्रहं
दितिजहारिणं दीनरक्षकम्।
दिनकरप्रभं दिव्यमानसं
भजत सज्जना मारुतात्मजम्॥ **6**॥

कपिकुलोद्भवं केसरीसुतं
भरतपङ्कजं भीमनामकम्।
विबुधवन्दितं विप्रवंशजं
भजत सज्जना मारुतात्मजम्॥ **7**॥

पठति यः पुमान् पापनाशकं
पवनजाष्टकं पुण्यवर्धनम्।
परमसौख्यदं ज्ञानमुत्तमं
भुवि सुविर्मलं याति सम्पदम्॥ **8**॥

॥ श्री पवनजाष्टकं समाप्तम्॥